# Gangakrita Shivakripartha Prarthana

# ગઙ્ગાકૃતા શિવકૃપાર્થપ્રાર્થના

## Document Information

Text title : Gangakrita Shivakripartha Prarthana

File name : shivakRRipArthaprArthanA.itx

Category : shiva, shivarahasya

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shivarahasyam | harAkhyaH tRitIyAMshaH | uttarArdham | adhyAyaH 10 | 64-71 ||

Latest update : January 30, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 1, 2024

*sanskritdocuments.org*

Gangakrita Shivakripartha Prarthana

# ગઙ્ગાકૃતા શિવકૃપાર્થપ્રાર્થના

નમો નમસ્તે ગિરિજાસહાય નમો નમસ્તે પુનરિન્દુમૌલે ।
નમો નમસ્તેઽસ્તુ પુનર્નમસ્તે નમો નમસ્તે કરુણાસમુદ્ર ॥ ૬૪॥

શ્રીમન્મહારુદ્ર નમો નમસ્તે શ્રીવીરરુદ્રાય નમો નમસ્તે ।
નમો નમસ્તે ગિરિશ ત્રિનેત્ર નમો નમસ્તેઽસ્તુ વિભૂતિગાત્ર ॥ ૬૫॥

શ્રીનીલકણ્ઠાય નમો નમસ્તે ભાલપ્રદેશાનલલોચનાય ।
નમો નમસ્તેઽસ્તુ કપર્દિને નમો નમો નમસ્તેઽસ્તુ સદાશિવપ્રભો ॥ ૬૬॥

માર્તાણ્ડમણ્ડલનિવાસ નમો નમસ્તે માર્તાણ્ડકુણ્ડલવિરાજિતભૂષણાય ।
માર્તાણ્ડચણ્ડકરસઙ્કુલમણ્ટપાય તસ્મૈ મૃડાય ભગવન્ ભવ તે નમોઽસ્તુ ॥ ૬૭॥

યદ્વીક્ષણપ્રસરમાત્રવિધૂતપાપાઃ સમ્પ્રાપ્નુવન્તિ પરમં પદમિન્દુમૌલેઃ ।
તૈરેવ માં મુહુરપિ પ્રણતાં પ્રપશ્ય પશ્યાદ્ય વહ્નિનિકરાશ્રિતતપ્તદેહામ્ ॥ ૬૮॥

માતા ત્વમેવ ભગવન્ જનકસ્ત્વમેવ મિત્રં ત્વમેવ મમ ચન્દ્રકલાવતંસ ।
ભ્રાતા ત્વમેવ ભગવન્ ગિરિજાસહાય ત્રાતા ત્વમેવ ભગવન્ હર નીલકણ્ઠ ॥ ૬૯॥

ત્વં કાલકૂટવિષધારણધીરચિત્તઃ ત્વં મારસંહરણકારણભૂત એવ ।
બ્રહ્માણ્ડમણ્ડલસુખણ્ડનહેતુભૂતઃ ત્વામેવ તાવદધુના શરણં પ્રપન્નાઃ ॥ ૭૦॥

ત્વન્નામકીર્તનસુધારસપાનપીનો દીનોઽપિ દૈન્યમપહાય દિવં પ્રયાતિ ।
પશ્ચાદુપૈતિ પરમં પદમીશ તેન તદ્ભાગ્યયોગ્યકરુણાં કુરુ મામપીશ ॥ ૭૧॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે ગઙ્ગાકૃતા શિવકૃપાર્થપ્રાર્થના સમ્પૂર્ણા ॥

- ॥ શ્રીશિવરહસ્યમ્ । હરાખ્યઃ તૃતીયાંશઃ । ઉત્તરાર્ધમ્ । અધ્યાયઃ ૧૦। ૬૪-૭૧ ॥

- .. shrIshivarahasyam . harAkhyaH tRRitIyAMshaH . uttarArdham . adhyAyaH 10. 64-71 ..

Proofread by Ruma Dewan

*Gangakrita Shivakripartha Prarthana*

pdf was typeset on February 1, 2024

Please send corrections to *sanskrit@cheerful.com*